CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 552

Title Ṛṣipañcamī vrata

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 552 Subject: Pauranic Rit.

Title: Ṛuṣipancami Vrata

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.3" by 4.1" Extent: 10 foll.

Language: Sanskrit. Script: Devanāgari

Remarks: Incomplete.

॥ भाद्रशुक्लपंचम्यां ऋषिपंचमीव्रतं ।

श्रीगणेशाय नमः ॥ ॥ चैत्रशुक्लप्रतिपदि वत्सरारंभः ॥ तत्रौदयिकी तिथिर्ग्राह्या · चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि । शुक्ल
पक्षे समग्रं तु तदा सूर्योदये सतीति हेमाद्रौ ब्राह्मोक्तेः ॥ दिनद्वयेपि तद्व्याप्तावव्याप्तौ वा पूर्वैव · वत्सरादौ वसंतादौ बलिराज्ये तथैव च ·
पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैरिति गोविंदार्णवे वृद्धवसिष्ठोक्तेः ॥ चैत्रस्य मलमासत्वे तु तत्रैव वत्सरारंभ इत्युक्ते ·
शुद्ध एवेत्यन्ये ॥ अत्र तैलाभ्यंगो नित्यः ॥ वत्सरादौ वसंतादौ बलिराज्ये तथैव च · तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यते इति वृ
द्धवसिष्ठोक्तेः ॥ अस्यामेव नवरात्रारंभः ॥ तत्र परयुता ॥ अमायुक्ता न कर्तव्या प्रतिपच्चंडिकार्चने · मुहूर्तमात्रा कर्तव्या द्विती
यागुणान्वितेति देवीपुराणात् ॥ अत्र प्रपादानमुक्तं मदनरत्ने भविष्ये · अतीते फाल्गुने मासि प्राप्ते चैत्रे महोत्सवे · पुण्येह्नि विप्रकथि
ते प्रपादानं समारभेत् दिनमुपक्रम्य · ततश्चोत्सर्जयेद्विद्वान्मंत्रेणानेन मानवः · प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता · अस्याः प्र
दानात्पितरः तृप्यंतु हि पितामहाः · अनिवार्यं ततो देयं जलं मासचतुष्टयमिति · तथा प्रपादानाशक्तेन विशेषाद्धर्ममीप्सुना ·
प्रत्यहं धर्मघटको वस्त्रसंवेष्टिताननः · ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः · तत्र मंत्रः · एष धर्मघटो दत्तो ब्रह्मविष्णुशि
वात्मकः · अस्य प्रदानात्सकला मम संतु मनोरथाः · अनेन विधिना यस्तु धर्मकुंभं प्रयच्छति · प्रपादानफलं सोपि प्राप्नोतीह न सं
शय इति ॥ चैत्रशुक्लतृतीयायां गौरीमीश्वरसंयुतां संपूज्य दोलोत्सवं कुर्यात् · तथा च निर्णयामृते देवीपुराणे · तृतीयायां यजेद्दे
वीं शंकरेण समन्वितां · कुंकुमागुरुकर्पूरमणिवस्त्रसुगंधकैः · स्रग्गंधधूपदीपैश्च दमनेन विशेषतः · आंदोलयेत्ततो वत्स शिवो
मां तुष्ट्यै सदेति · इयं परा ग्राह्या · मुहूर्तमात्रसत्त्वेपि दिने गौरीव्रतं परे इति माधवोक्तेः ॥ अत्रैव सौभाग्यशयनव्रतमुक्तं मात्स्ये ॥
राम १

वसंतमासमासाद्य तृतीयायां जनप्रिये · सौभाग्याय सदा स्त्रीभिः कार्यं पुत्रसुखेप्सुभिरिति · इयं च मन्वादिः ॥ शुक्लपक्षे स्थित
त्वाच्च पौर्वाह्णिकी ग्राह्या · पूर्वाह्णे तु सदा ग्राह्याः शुक्ला मन्वादयः · दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिकाः इति गारुडवच
नादिति हेमाद्रिः ॥ कालादर्शे तु पित्र्ये त्वापराह्णिकत्वमेवोक्तं · अत्र च श्राद्धमुक्तं मात्स्ये · कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु ·
हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेदिति · अधिमासेपीदं कर्तव्यं · मन्वादिकं नैमित्तिकं च कुर्यान्मासद्वयेपि चेति स्मृतिचंद्रिको
क्तेः ॥ अत्र पिंडदानं नास्ति · विषुवायनसंक्रांतिमन्वादिषु युगादिषु · विहाय पिंडनिर्वापं सर्वं श्राद्धं समाचरेत् · इति कालादर्शोक्तेः ॥
अकरणे प्रायश्चित्तमुक्तं मंत्रविधाने · त्वं भुवः प्रति मंत्रं च शतवारं जले जपेत् · मन्वाद्ययोपदानस्य कृते नैव चापि यदिति · एवं
षण्णवतिश्राद्धान्यपि नित्यानि · तेषामयं संग्रहः · अमामनुयुगक्रांतिधृतिपातमहालयाः · अन्वष्टका च पूर्वेद्युः षण्णवत्योष्टकाश्च ये
ति ॥ चैत्रशुक्लतृतीया मत्स्यजयंती · चैत्रशुक्लपंचमीत्यन्ये · आषाढशुक्लैकादशीत्यपरे · इयं च तदुपासकानां नित्या अन्येषां तु का
म्या ॥ चैत्रशुक्लपंचमी कल्पादिः ॥ अत्र स्नानदानादि महाफलं ॥ चैत्रशुक्लाष्टम्यां भवान्युत्पत्तिः ॥ तत्र युग्मवाक्यात्परा ग्राह्या ॥ अत्र
भवानीयात्रोक्ता काशीखंडे · भवानीं यस्तु पश्येत शुक्लाष्टम्यां मधौ नरः · न जातु शोकं लभते सदानंदमयो भवेदिति · अत्रैवाशो
ककलिकाप्राशनमुक्तं हेमाद्रौ लैंगे · अशोककलिकाश्चाष्टौ ये पिबंति पुनर्वसौ · चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः ·
प्राशनमंत्रस्तु · त्वामशोक हराभीष्ट मधुमाससमुद्भव · पिबामि शोकसंतप्तो मामशोकं सदा कुर्विति · पृथ्वीचंद्रोदये विष्णुः ·
पुनर्वसुबुधोपेता चैत्रे मासि सिताष्टमी · प्रातस्तु विधिवत्स्नात्वा वाजपेयफलं लभेदिति । चैत्रशुक्लनवमी रामनवमी · सा ।

नमध्याह्नयोगिनी ग्राह्या· उक्तं चागस्त्यसंहितायां· चैत्रशुद्धे तु नवमी पुनर्वसुयुता यदि। सैव मध्याह्नयोगेन महापुण्यतमा भवे
दिति· तथा· चैत्रे मासे नवम्यां तु जातो रामः स्वयं हरिः। पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा· केवलापि सदोपोष्या नवमी
शब्दसंग्रहादिति· दिनद्वये मध्याह्नव्याप्तौ तदभावे वा पुनर्वसुयुतामपि पूर्वां त्यक्त्वा परैव ग्राह्या· तदुक्तं तत्रैव· नवमी चाष्टमी
विद्धा त्याज्या विष्णुपरायणैः। अत्र विष्णुपरायणैरिति वदतां यदा प्रातस्त्रिमुहूर्तान नवमी दशमी च तस्मिन्नेव दिने समाप्यते·
तदा स्मार्तानां उत्तरदिवसे एकादशीनिमित्तोपवासेन नवमीव्रतांगपारणालोपो मा भूदिति तत्र स्मार्तैरष्टमीविद्धैव ग्राह्या· वैष्णवै
स्तु परैव निष्ठितमिति बोध्यं· इदं च व्रतं नित्यकाम्यं· उपोषणं जागरणं पितॄनुद्दिश्य तर्पणं· तस्मिन्दिने तु कर्तव्यं ब्रह्मप्राप्तिमभी
प्सुभिः। यस्तु रामनवम्यां तु भुंक्ते मोहाद्विमूढधीः। कुंभीपाकेषु घोरेषु पच्यते नात्र संशयः। इत्यगस्त्यसंहितोक्तेः। अत्र ध्यानमाद
नप्रकारस्तु· रमांस्वर्णमयीं रामप्रतिमां समलंकृतां। चित्रवस्त्रयुगच्छन्नां रामो मे राघवायते। श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः। राम
इति दत्वा विधानेन दद्याद्वै दक्षिणां तु वै· ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः। मध्याह्ने इज्या रात्रौ जागरणं तथा परेद्युः प्रात २
पायसहोमः· श्रीरामप्रतिमादानादिकं हेमाद्रौ बोध्यं· इदं च मलमासे न कार्यं· सुजन्मप्यजसंस्कारे नोपवासः कृतोपि वेन्न न
कुर्यान्मलमासे तु महादानं व्रतानि चेति माधवीयसंग्रहवचनात्· अर्घ्यमंत्रस्तु· दशाननवधार्थाय धर्मसंस्थापनाय च। राक्ष
सानां विनाशाय दैत्यानां निधनाय च· परित्राणाय साधूनां जातो रामः स्वयं हरिः। गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोनघेति ८
चैत्रशुक्लैकादश्यां दोलोत्सवः कौस्तुभे· चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः। आंदोलनीयो देवेशः सलक्ष्मीको
महोत्सवैरिति। चैत्रशुक्लद्वादश्यां दमनोत्सवः। द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः। बौधायनादिभिः प्रोक्तः

कर्तव्यः प्रतिवत्सरमिति रामार्चनचंद्रिकोक्तेः। ऊर्जे व्रतं मधौ दोला श्रावणे तंतुपूजनं· चैत्रे च मदनारोपं अकुर्वाणो व्रजत्यधः
इति तत्रैव पाद्मवचनाच्च· इदं शुक्लाष्टावपि कार्यं· उपाकर्मोत्सर्जनं च पवित्रदमनार्पणं। ईशानस्य बलिर्विष्णोः शयनं परिवर्त
नं। कुर्यात् शुक्लस्य चतुरो मौढ्ये प्रीतिविनिश्चय इति गोविंदार्णवे वृद्धगार्ग्यवचनात्। चैत्रशुक्लत्रयोदश्यामनंगव्रतं· तत्र सा
पूर्वा ग्राह्या· त्रयोदशी तिथिः पूर्वः सित इति दीपिकोक्तेः। चैत्रशुक्लचतुर्दशी पूर्वा ग्राह्या· निशि भ्रमंति भूतानि शक्तयः शूलधृ ३
धृतः· अतस्तत्र चतुर्दश्यां सत्यां तत्पूजनं भवेदिति ब्रह्मवैवर्तात्· मस्रो· श्रावणमासस्य शुक्लायां तु चतुर्दशी· सा रात्रिव्यापि
नी ग्राह्या नान्या शुक्ला कदाचनेति हेमाद्रौ बौधायनोक्तेश्च। चैत्री पौर्णमासी सामान्यनिर्णयात्परैव· अत्र विशेषो निर्णयामृते·
विष्णुस्मृतौ· चैत्री चित्रायुता चेत्स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोतीति। तथा ब्राह्मे· मंदे वार्के गुरौ वापि वारेष्वेतेषु चै
त्रिका· तत्राश्वमेधजं पुण्यं स्नानश्राद्धादिभिर्भवेत्· वायवीये· संवत्सरकृतार्चायाः साफल्याय खिलान्सुरान्। दमनेनार्चये
च्चैत्र्यां विशेषेण सदाशिवं· इमं मन्वादिरपि। चैत्रकृष्णत्रयोदश्यां महावारुणीसंज्ञको योगः। तदुक्तं वाचस्पतिनिबंधे· शनि
वारसमायुक्ता सा महावारुणी स्मृता· गंगायां यदि लभ्येत कोटिसूर्यग्रहाधिका· शुभयोगसमायुक्ता शनौ शततिषा यदि।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत्· चैत्रासिते वारुणऋक्षयुक्ता त्रयोदशी सूर्यसुतस्य वारे· योगे शुभे सा महती महत्याः
गंगाजलेर्कग्रहकोटितुल्येति· त्रिस्थलीसेतौ ब्रह्मांडपुराणेपि· वारुणेन समायुक्ता मधौ कृष्णत्रयोदशी· गंगायां यदि लभ्येत कोटि
सूर्यग्रहैः समेति। कल्पतरौ ब्राह्मे· मधौ कृष्णत्रयोदश्यां शनौ शततिषायुते· वारुणीति समाख्याता तस्यां चेत्तु महत्तमेति।
चैत्रकृष्णचतुर्दश्यां तु विशेषः स्मर्यते। पृथ्वीचंद्रोदये पुलस्त्यः। चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसंनिधौ· न प्रेतत्वमवाप्नो

तिगंगायां तु विशेषत इति । अत्र पूर्वा ग्राह्या कृष्णपक्षस्थत्वात् ॥ ॥ इति चैत्रः ॥ ॥ पृथ्वीचंद्रोदये पाद्ये तीर्थं चानुदिनं स्नानं
तिलैश्च पितृतर्पणं । दानं धर्मघटादीनां मधुसूदनपूजनं । माधवे मासि कुर्वीत मधुसूदनतुष्टिदं ॥ अथ वैशाखस्नानं ॥ तत्र
पृथ्वीचंद्रोदये विष्णुस्मृति पाद्मयोः । तुलामकरमेषेषु प्रातःस्नानं विधीयते । हविष्यं ब्रह्मचर्यं च महापातकनाशनं ॥ मि
सौरमानाउक्तः । अन्यदपि पक्षद्वयमुक्तं तत्रैव पाद्मे । मधुमासस्य शुक्लायामेकादश्यामुपोषितः । पंचदश्यां चरेज्जोषी रमेषसं
क्रमणेतु वा वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया । मधुसूदनमभ्यर्च्य कुर्यात्संकल्पपूर्वकं ॥ तत्र मंत्रः ॥ वैशाखं सकलं
मासं मेषसंक्रमणे रवेः । प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः ॥ मधुहंतुः प्रसादेन ब्राह्मणानामनुग्रहात् । निर्विघ्नम
स्तु मे पुण्यं वैशाखस्नानमन्वहं । माधवे मेषगे भानौ मुरारे मधुसूदन । प्रातःस्नानेन मे नाथ फलदो भव पापहन्निति ॥ तीर्थनामा
परिज्ञाने तु तत्रैव स्मर्यते । यदा न ज्ञायते नाम नद्यास्तीर्थस्य वा द्विजाः । तदेवमुच्चारणं कार्यं विष्णुतीर्थमिदं त्विति ॥ अत्र त्रिकालं
तुलस्या विष्णुपूजा । अश्वत्थमूले जलदानं चेत्यादि तत्रैवोक्तं । अशक्तस्त्र्यहं स्नायात् । तदुक्तं तत्रैव पाद्मे । त्रयोदश्यां चतुर्द
श्यां वैशाख्यां च दिनत्रयं । अपि सम्यग्विधानेन नारी वा पुरुषोपि वा । प्रातःस्नातः सनियमः सर्वपापैः प्रमुच्यत इति । यदा तु वैशा
खो मलमासो भवति तदा काम्यानां तत्र समाप्तिनिषेधात् मासद्वयं स्नानं तन्नियमाश्च कर्त्तव्याः ॥ मासोपवासचांद्रायणादिकम
लमास एव समापयेत् । तदुक्तं दीपिकायां । नियतत्रिंशद्दिनत्वाद्युनेमास्यारभ्य समापयेत्तमलिने मासोपवासव्रतमिति । वै
शाख्यां विधिना स्नात्वा भोजयेद्ब्राह्मणान्दश । कृशरं सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ वैशाखशुक्लतृतीयाऽक्षयतृतीया ।
सा च पूर्वाह्णव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्तौ तु परेवेति निर्णयामृतादौ लिखितं । इयं युगादिरपि । भारते । यामन्वाद्यायुगाद्या याम २

श्च तिथयस्तासु मानवः । स्नात्वा हुत्वा च दत्वा च जप्त्वानंतफलं लभेदिति । श्राद्धेपि पूर्वाह्णव्यापिनी ग्राह्या । पूर्वाह्णे तु सदा कार्याः
शुक्ला मन्वयुगादयः । दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिकाः इति पाद्मोक्तेः । दैवे शुक्ले इति तथा कृष्णे युगादीः कवयो विदुः । शुक्ले
पौर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके । इति नारदोक्तेश्च । दिवोदासीये गोभिलः । वैशाखस्य तृतीयां यः पूर्वविद्धां करोति वै ।
हव्यं देवा न गृह्णन्ति कव्यं च पितरस्तथेति । स्मृत्यर्थसारगोविंदार्णवादिष्वप्येवं । तेनेयं पूर्वाह्णव्यापिन्येव । दिनद्वये तथात्वे तु प
रा । इमानुपक्रम्य । गौरी विनायकोपेता पुण्यकोटिप्रदा सदेति नारदोक्तेः ॥ उपवासे तु पूर्वा । सवैव्यतीपातो युगमन्वादयस्तथा ।
संमुखा उपवासेषु दानादावेतिमाः स्मृताः । इत्यनंतभट्टोदाहृतवचनात् । यत्तु निर्णयामृते तत्कृतोक्तं श्राद्धमापराह्णिकं यु
क्ता एष मन्वंतरादीनां युगादीनां विनिर्णयः । इति कालादर्शोक्तेः त्वात् श्राद्धमापराह्णिक्येव ग्राह्या । दैवे शुक्ले इत्यादि वचनं तु
विष्णुपूजादिविषयकमिति । तत्सर्वं निर्मूलगोभिलादिवचनविरुद्धं । कालादर्शोक्तिस्तु कृष्णपक्षयुगादिविषयेति दिक् ॥
अत्र विशेषो हेमाद्रौ भविष्ये । वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च । गंगातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः । तस्यां का
र्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् । यवान्दद्याद्द्विजातिभ्यः प्रयतः प्राशयेद्यवानिति । अत्र दानविशेषस्तत्रैव भविष्ये । इ
त्युक्त्य । उदकुंभान्सकनकान्सान्नान्सर्वरसैः सह । यवगोधूमचणकान्सक्तुदध्योदनं तथा । ग्रैष्मिकं सर्वमेवात्र सस्य
दाने प्रशस्यत इति । [illegible]पुराणे । तृतीयां तु वैशाखे रोहिण्यृक्षे प्रपूज्य तु । उदकुंभप्रदानेन शिवलोके महीयते । मंत्रस्तु । इ
एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः । अस्य प्रदानात्तृप्यन्तु पितरोपि पितामहाः । गंधोदकतिलैर्मिश्रं सान्नं कुंभं फलान्वि
तं । पितृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठतु इति । इह च श्राद्धं पिंडरहितमित्युक्तं । अत्र रात्रिभोजने प्रायश्चित्तं सम्यग्विधाने रा
वर्तमानकाले प्रयोगः । पितृभ्योऽहं ददाम्यद्य अक्षय्यमुपतिष्ठतु ॥

श्रोतुं केचत्सरे तु मन्वादिषु युगादिषु · अनिस्वद्दष्टिमंत्रं च जपेद्दशन पातकमिति । अपरार्केयमः । कृतोपवासाः सलिलं तु युगादि
तु ने षु तु · दास्यंत्य न्वादि संहितं तेषां लोका महोदयाइति · वैशाखे मलमासे सति तु तत्रैव युगादिः कार्या · दशहरा सु नोत्त
रे षु तु द्वेपि युगादिषु इति हेमाद्रौ ऋष्यशृंगवचनात् । अष्टोदके तु मन्वादि महालय युगादिष्वितिकास्मात् शंकु तो मलमास
कर्तव्ये षु वि गणनाच्च । महालये शब्देन हमघात्र योदशी विवक्षिते तिमाधवः । स्मृति चंद्रिकायां तु मासद्वये पि कर्तव्या
त्युक्तं । योमाह्निकमासिकश्राद्धं चापर पक्षिकं । मन्वादि केनै र्थिकं च कुर्यान्मासद्वयेपि चेति । अपरपक्षः कृष्णपक्षः । न
तु महालयः । तस्य तत्र विधेयात् · मदनरत्ने मरीचिः । प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्सरं · मन्वादौ च युगादौ च तत्कलौ
हुतयोरपीति · प्रतिवत्सरं क्रियमाणं कन्यादिश्राद्धमिति तन्ने व्याख्यातं · अत्र समुद्रस्नानं महत्फलं · तदुक्तं पृथ्वीचंद्रोदये
सौरपुराणे । युगादौ तु नरः स्नात्वा विधिवल्लवणोदधौ · गोसहस्र प्रदान स्य कृत्स्नस्य फलं हि यत् · तत्फलं स्नानमात्रेण भूमि राम
दानस्य च ध्रुवमिति · अथ निर्णयः सर्वयुगादिषु बोद्धव्यः । ... याच ... रामजयंती । सा च प्रदोषव्यापिनी ग्राह्या · तदु ४
क्तं मार्गवार्चेनदीपिकायां स्कांदे नविष्ण्वोः । वैशाखस्यासिते पक्षे तृतीयायां पुनर्वसौ · निशायाः प्रथमे यामे रामाख्यः सत्य
... रेणुकायां स्तु योगं ... स्वयमिति । दिनद्वये तद्व्याप्ताव व्याप्तौ वांशतः समव्याप्तौ च परा · अन्यथा पूर्वैव तदु
क्तं तत्रैव तत्र विष्णे । शुक्लात्तृतीया वैशाखे शुद्धोपोष्या दिनद्वये । निशायाः पूर्वयामे चेदुत्तरा न्यत्र पूर्विकेति । वैशाखशुक्लसप्त
म्यां गंगोत्पत्तिः । तदुक्तं पृथ्वीचंद्रोदये ब्राह्मे · वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी पुरा · क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्रा

त्तु दक्षिणात् · तां तत्र पूजयेद्देवीं गंगां गगनमेखलामिति । इयं च शिष्टाचारात्मध्याह्नव्यापिनी ग्राह्या · दिनद्वये तद्व्याप्ता
व्याप्त्यभावे एकदेशव्याप्तौ वा पूर्वा · युग्मवाक्यात् · । वैशाखशुक्लद्वादश्यां योगविशेषो हेमाद्रौ · पंचाननस्थौ गुरुभूमिपुत्रौ
मेषे रविः स्याद्यदि शुक्लपक्षे · पाशांकिधानाकरनेन युक्ता तिथिर्व्यतीपातइतीह योगः । अस्मिन्कृतो भूमिहिरण्यवस्त्र
दानेन सर्वं परिहाय पापं · सुरत्वमिंद्रत्वमनामयत्वमत्यर्थिपत्यं लभते मनुष्य इति · पंचाननः सिंहः । पाशांकिधानादि
थिर्द्वादशी · करनो हस्तः ॥ वैशाखशुक्लचतुर्दशी नृसिंहजयंती · सा प्रदोषव्यापिनी ग्राह्या । तदुक्तं हेमाद्रौ नृसिंहपुरा
णे · वैशाखे शुक्लपक्षे तु चतुर्दश्यां निशामुखे · मज्जन्म संभवं पुण्यं व्रतं पापप्रणाशनं · वर्षे वर्षे तु कर्तव्यं मम संतुष्टि
कारणमिति । दिनद्वये पि तद्व्याप्तौ अंशतः समव्याप्तौ च परा · विषमव्याप्तौ त्वधिकव्याप्तिमती · दिनद्वये प्यव्याप्तौ तु सा
पूर्वदिने ... णकालव्याप्तेः सत्वात् · परदिने च तदभावात् । अस्यां च संकल्परूपव्रतोपक्रमो मध्याह्ने एव कर्तव्यः । ततो म
ध्याह्ने ... यां तथा दौ विमलेन जलेन तूपक्रम्य · परिधाय ततो वासो व्रतकर्म समारभेदिति तत्रैवोक्तेः । अस्या एव योग
विशेषेण प्राशस्त्यं तत्रैव स्मर्यते । स्वाती नक्षत्र योगे च शनीवारे च मद्व्रतं । सिद्धियोगस्य संयोगे वणिजे करणे तथा । पुंसो
... भाग्ययोगेन लभ्यते दैवयोगतः । तथा · एभिर्योगैर्विनापि स्यान्मद्दिनं पापनाशनं । तथा सर्वेषामेव वर्णानामधिका
रोस्ति मद्व्रते । तथा विज्ञाय मद्दिनं यस्तु लंघयेत्पापकृन्नरः । सयाति नरकं घोरं यावच्चंद्रदिवाकरौ · अत एवेदं नित्यका
म्यमित्याहुः । वैशाखपौर्णमास्यां विशेषः स्मर्यते न विष्णे । वैशाखी कार्तिकी माघी तिथयो ऽतीव पूजिताः । स्नानदान

विहिनास्नानेनेयाः पंडुनंदनेति ॥ ॥ इति वैशाखः ॥ ज्येष्ठशुक्लतृतीयायां रंभाव्रतं तदुक्तं माधवीये भविष्ये नरैः
ऊरुधैर्यबलेन रंभाख्यव्रतमुत्तमं । ज्येष्ठशुक्लतृतीयायां स्नाननियमतत्परैः सा च पूर्वविद्धा ग्राह्या । वृहत्तपा तथा
रंभा सावित्रीवटपैतृकी । कृष्णाष्टमी च भूता च नक्तैर्व्यासं भुरवीतिथिरिति स्कांदोक्तेः । ज्येष्ठशुक्लदशमी दशहरा तदु
क्तं हेमाद्रौ ब्राह्मे ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता । हरते दश पापानि तस्माद्दशहरा स्मृतेति । वाराहे दशमी
शुक्लपक्षे तु ज्येष्ठे मासि कुजेऽहनि । अवतीर्णा यतः स्वर्गाद्धस्तर्क्षे च सरिद्वरा । हरते दश पापानि तस्माद्दशहरा स्मृ
तेति । स्कांदे तु दशयोगा उक्ताः । यथा । ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः । गरानंदे व्यतीपाते कन्याचंद्रे वृ
षे रवौ । दशयोगे नरः स्नात्वा दशपापैः प्रमुच्यते इति । इह बुधभौमयोर्विकल्पः । इयं च यत्र योगबाहुल्यं सा ग्राह्या । यो
गाधिक्ये फलाधिक्यात् । ज्येष्ठे मलमासे सति तत्रैव दशहरा कार्या न तु शुद्धे । दशहरासु नोत्कर्ष इत्युक्तेः । स्कांदे । यां रान
कांचित्सरितं प्राप्य दद्याद्दर्भतिलोदकं । मुच्यते दशभिः पापैः समहापातकैरपीति । अत्र विशेषः काशीखंडे स्मर्य ५
ते । ज्येष्ठे मासे सिते पक्षे प्राप्य प्रतिपदं तिथिं । दशाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः । एवं सर्वासु तिथिषु क्रमस्ना
यी नरोत्तमः । आशुक्लपक्षदशमीं प्रतिजन्माघमुत्सृजेत् । तथा । लिंगं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ । दशजन्मार्जितैः
पापैस्त्यज्यते नात्र संशयः ॥ ज्येष्ठशुक्लैकादशी निर्जला । तत्र निर्जलमुपोष्य विप्रेभ्यो जलकुंभान् दद्यादिति निर्ण
यामृते उक्तं ॥ ज्येष्ठीपौर्णमास्यां सावित्रीव्रतं । तदुक्तं स्कांदभविष्ययोः । ज्येष्ठे मासे सिते पक्षे द्वादश्यां रजनीमुखे इत्यु

पक्रम्य व्रतं त्रिरात्रमुद्दिश्य दिवा रात्रिं स्थिरा भवेत् इत्युक्त्वांते उपसंहृतं । ज्येष्ठे मासि सिते पक्षे पूर्णिमायां तया सत्या ची
र्णं पुरा महाराज्ञ्या कथितं ते मयाऽनघेति । दाक्षिणात्यास्त्वेतदेवाचरंति । पाश्चात्यादयस्त्वमावास्यायामाचरंति । तदु
क्तं निर्णयामृते भविष्ये । अमायां च तथा ज्येष्ठे वटमूले महासती । त्रिरात्रोपोषिता नारी विधिनानेन पूजयेत् । अशक्तौ
तु त्रयोदश्यां नक्तं कृत्वा जितेंद्रिया । अयाचितं चतुर्दश्याममायां समुपोषणमिति । हेमाद्र्यादिभिरुक्तं । भाद्रपदपूर्णि
मायामिदमुक्तं । तच्च नेदानीमाचरंति । अत्र पूर्णिमाऽमावास्ये पूर्वविद्धे ग्राह्ये । भूतविद्धा न कर्तव्या अमावास्या च पू
र्णिमा । वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमं इति ब्रह्मवैवर्तात् । यदा त्वष्टादशघटिका चतुर्दशी तदा परैव । पूर्ववि
द्धैव सावित्रीव्रते पंचदशी तिथिः । नाप्योष्टादश नाड्यस्तस्य स्युश्चेत्तत्र परेऽहनीति माधवोक्तेः । अत्र पूर्णिमानुरोधेनैव य
था त्रिरात्रसंपत्तिर्भवति तथा त्रयोदश्यादि ग्राह्यं । तस्याः प्राधान्यात् । एवममायामपि । अस्यामेव पौर्णमास्यां विशेषः
स्मर्यते आदित्यपुराणे । ज्येष्ठे मासे तिलान्दद्यात्पौर्णमास्यां विशेषतः । अश्वमेधस्य तत्पुण्यं तत्प्राप्नोति न संशयः । गघ
विष्णुः । ज्येष्ठी ज्येष्ठायुता चेत्स्यात् तस्यां छत्रोपानत्प्रदाने नरो नराधिपत्यमाप्नोतीति । इयं मन्वादिरपि सा पौर्वा
ह्णिकी ग्राह्येत्युक्तं तथा अपरार्के वामनपुराणे उदकुंभांबुदानं च तालवृंतं सचंदनं । त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्ये
ष्ठमासि त्विति ॥ ॥ इति ज्येष्ठः ॥ आषाढशुक्लदशमी पौर्णमासी च मन्वादिः । पूर्वाह्णव्यापिनीत्युक्तं । आषाढशुक्लद्वाद

आमनुराधायोगरहितायांपारणंकुर्यात्। तथाच हेमाद्रौ भविष्ये। आभाकासितपक्षेषु मैत्रश्रवणरेवती। संगमेनहि भो
क्ष्यं द्वादशी हरेदिति। आषाढभाद्रकार्त्तिकेषु द्वादशीषु अनुराधाश्रवणरेवतीयोगे पारणं कुर्यादित्यर्थः। अत्र
विशेषो विष्णुधर्मे। मैत्राद्यपादे स्वपितीह विष्णुः पौष्णांत्यपादे प्रतिबोधमेति। श्रवणे च मध्ये परिवर्त्तमेति सुप्तिप्रबोधपरिव
र्त्तमेव वर्ज्यं। आषाढशुक्ल एव एकादश्यां द्वादश्यां वा विष्णुशयनोत्सवः कर्तव्यः। उक्तं च हेमाद्रौ ब्राह्मे। एकादश्यां तु शुक्ला
यामाषाढे भगवान्हरिः। भुजंगशयने शेते क्षीरार्णवजले सदेति। हेमाद्रौ भविष्ये। द्वादश्यां शुक्लपक्षे च प्रस्वापावर्तनोत्स
वाः। तत्रैव वाराहे। द्वादश्यां संधिसमये नक्षत्राणामसंभवे। आभाकासितपक्षेषु शयनावर्त्तनादिकमिति। अत्र द्वादश्य
मिति पारणाहमात्रं विवक्षितं। पारणाहे पूर्वरात्रे घंटादीन्वादयन्कुर्यादिति रामार्चनचंद्रिकोक्तेः। इदं च मलमासे न कार्यं।
ईशानस्य बलिर्विष्णोः शयनं परिवर्त्तनम् इति कालादर्शे निषेधात्। अथ चातुर्मास्यव्रतारंभ उक्तो भारते। आषाढे तु सिते   राम
पक्षे एकादश्यामुपोषितः। चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्नियतो नरः इति। अस्य नित्यत्वं तत्रैवोक्तं। वार्षिकांश्चतुरो मासा   ६
न्वाहयेत्केनचिन्नरः। व्रतेनो चेदाप्नोति किल्बिषं वत्सरोद्भवं। असंभवे तुलार्केपि कर्तव्यं तत्प्रयत्नतः इति। अस्यारंभश्चतु
र्थ्यादावपि कार्यः। न शौचं शवं न मौढ्यं च शुक्रगुर्वोर्न वा तिथेः। खंडत्वे चिंतयेदादौ चातुर्मास्यविधौ नरः इति वृद्धगार्ग्योक्तेः। इ
दं च द्वितीयाद्यारंभविषयं तथा आशौचमध्येपि द्वितीयाद्यारंभो भवत्येव। अशुचिर्वा शुचिर्वापि यदि स्त्री यदि वा पुमान्।
व्रतमेतन्नरः कुर्वन्मुच्यते सर्वपातकैरिति मार्गवार्चनदीपिकायां स्कांदोक्तेः। आरब्धे सूतकं न स्यात् अनारब्धे तु सूतकं इति

विष्णुवचनाच्च। यत्तु असंक्रांतं तथा मासं दैवे पित्र्ये च कर्मणि। मलमासमशौचं च वर्जयेन्मतिमान्नर इति हेमाद्रौ चातुर्मास्य
व्रतप्रकरणे भविष्यवचनं। तत्प्रथमारंभविषयं। न च प्रतिवर्षं चातुर्मास्यव्रतप्रयोगाणां भिन्नतया आशौचादिपाते द्वि
तीये प्रयोगोपि कथं स्यादिति वाच्यं। प्रतिवर्षं च यः कुर्यादेवं वै संस्मरन्हरिं। देहांते तिप्रदीप्तेन विमानेनार्कवर्चसा। मोदते
विष्णुलोके सौ यावदाभूतसंप्लवमिति हेमाद्रौ भविष्यवचनेन प्रयोगैक्यावगतेः। व्रतग्रहणप्रकारश्च हेमाद्रौ भविष्ये।
एवं तां प्रतिमां विष्णोः पूजयित्वा स्वयं नरः। प्रार्थयेताग्रतो विष्णोः कृतांजलिपुटस्तथा। चतुरो वार्षिकान्मासान्देवस्यो
त्थापनावधि। इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत। भविष्ये। श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा। दुग्धमाश्वयुजे मासि
कार्त्तिके द्विदलं त्यजेत्। स्कांदे। चत्वार्येतानि नित्यानि चतुराश्रमवर्तिनां। प्रथमे मासि नित्यं शाकव्रतं नरैः। द्वितीयमासि क
र्त्तव्यं दधिव्रतमनुत्तमं। पयोव्रतं तृतीये तु चतुर्थेपि निशामय। द्विदलं बहुबीजं च वृंताकं चैव वर्जयेत्। नित्यान्येतानि
नित्यं व्रतान्याहुर्मनीषिणः। तथा। जंबीरं राजमाषांश्च मूलकं रक्तमूलकं। कूष्मांडं चेक्षुदंडं च चातुर्मास्ये त्यजेद्बुधः। त
था विशेषः। बदरीधात्रीकूष्मांडे तित्रिणीं त्यजेत्। जीर्णधात्रीफलं ग्राह्यं कार्यं विल्काय शोधनमिति। स्कांदे। वार्षिकांश्चतुरोमा
सान्प्रसुप्ते वै जनार्दने। मंचखट्वादिशयनं वर्जयेद्भक्तिमान्नरः। अनृतौ वर्जयेद्भार्यां मांसं मधु परोदनं। पटोलं मूलकं [illegible]
वृंताकं च न भक्षयेत् इत्यादि। शाकशब्दश्च दशधा तु रूढः। मूलपत्रकरीराग्रफलकांडाधिरूढकाः। त्वक्पुष्पं कवचं चेति

शाकदशविधं स्मृतमित्युक्तेः। अधिरूढं त्वंकुरः। आचारप्रदीपे वृंताकं च कलिंगं च बिल्वोदुंबरचिर्भटाः। उदरे यस्य
जीर्यंति तस्य दूरतरो हरिः। निःसटेति ह्रस्वपाठे दग्धान्नं। नीःसटेति दीर्घपाठे तु नीःसटं श्लेष्मातकमिति धन्वंतरिनिघं
टुः। तथा निष्पावान् राजमाषांश्च मसूरं संधितानि च। वृंताकं च कलिंगं च सुप्ते देवे विवर्जयेत्। संधितानि लवणशा
कानि। अत्रैव तप्तमुद्राधारणमुक्तं रामार्चनचंद्रिकायां। एष्वेव चंद्रोदये दोलामुद्रादिविषयं न दति निर्णितं॥ आषाढ
पौर्णमास्यां कोकिलाव्रतमुक्तं हेमाद्रौ भविष्ये। आषाढपौर्णमास्यां तु संध्याकाल उपस्थिते। संकल्पयेन्मासमेकं
श्रावणेऽहमहं ह्यहं। स्नानं करिष्ये नियता ब्रह्मचर्ये स्थिता सती। भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयामिति।
अस्य नक्तव्रतत्वात्सायाह्नव्यापिनी ग्राह्या। अत्रैव व्यासपूजोक्ता। तत्र मध्याह्नव्यापिनी ग्राह्या। दिनद्वये तथात्वे तु परे राम
वेति संन्यासपद्धतौ॥ इत्याषाढः॥ ॥श्रावणशुक्लतृतीया मधुस्रवाख्या गुर्जरे प्रसिद्धा। सा परयुता ग्राह्येति दिवो ७
दासीये। श्रावणशुक्लचतुर्थी पूर्वयुता मातृविद्धा गणेश्वर इति वचनात्। श्रावणशुक्लपंचमी नागपूजायां परा चम
त्कारचिंतामणौ पंचमी नागपूजायां कार्या षष्ठीसमन्विता। तस्यां तु तुषिता नागा इतरा सचतुर्थिकेति। मदनरत्नादा
वप्येवं। अत्र विशेषो हेमाद्रौ भविष्ये श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप। द्वारस्योभयतो लेख्या गोमयेन विषो
ल्बणाः। पूजयेद्विधिवद्वीर दधिदूर्वांकुरैः कुशैः। गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः। ये तस्यां पूजयंतीह नागा

न्भक्तिपुरःसराः। न तेषां सर्पतो वीर भयं भवति कुत्रचिदिति॥ श्रावणशुक्लद्वादश्यां दधिव्रतं प्रागुक्तं॥ तक्रादीनां
तु निषेधः। तत्र दधिव्यवहाराभावात्। अत्रैव द्वादश्यां विष्णोः। पवित्रारोपणमुक्तं हेमाद्रौ विष्णुरहस्ये। श्रावणस्य
सिते पक्षे कर्कटस्थे दिवाकरे। द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतं। द्वादश्यां श्रावणे वापि पंचम्यामथवा द्विज।
आनुकल्प्येषु कर्तव्यं पंचम्यामथवापि वेति। तथा शिवे तु तत्रैव कालोत्तरे तंत्रे। आषाढांते चतुर्दश्यां तत्पूर्वं नमसो
स्तथा। अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोः समम् इति। अधिवासनं तु दीपिकायां। गोदोहांतरिते काले पूर्वेद्युरधि
वासनमिति। गौणकालो रामार्चनचंद्रिकायां। पवित्रारोपणं विष्णोराश्रावणेन नवेद्यदि। कार्तिक्यवधि शुक्लास्ते कर्तव्यमि
ति नारदः। हेमरूप्यताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः। कुशैः काशैश्च कार्पासैर्ब्राह्मणपाकत्रिर्तितैः शुभैः। कृत्वा त्रिगुणि
तैः सूत्रैस्त्रिगुणीकृत्य शोधयेत्। तत्रोत्तमं पवित्रं तु षष्ट्या सहस्रैस्त्रिभिः। सप्तत्या सहितं ह्यन्यत् तथा मध्यमं स्मृतं। सा
शीतिना शतेनैव कनिष्ठं तत्समाचरेत्। साधारणपवित्राणि त्रिभिः सूत्रैः समाचरेत्। उत्तमं तु शतं ग्रंथि पंचाशन्मध्यम
ध्यमं कनिष्ठं तु पवित्रं स्यात् षट्त्रिंशद्ग्रंथिशोभनं। षट्त्रिंशच्च चतुर्विंशद्द्वादशेति च केचन। चतुर्विंशद्द्वादशाष्टावित्ये
के तु नयोलेंदुः। शिवपवित्रं तु तत्रैव शैवागमे। एकाशीत्यथवा सूत्रैस्त्रिंशता वाष्टयुक्तया। पंचाशता वा कर्तव्यं तुल्य
ग्रंथ्यंतरालकं। द्वादशांगुलमानानि व्यासादष्टांगुलानि च। लिंगविस्तारमानानि चतुरंगुलकानि चेति॥ एतच्च नित्यं न

करोतिविधानेनपवित्रारोपणंतुयः।तस्यसांवत्सरीपूजानिष्फलामुनिसत्तम।तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः।
वर्षेवर्षेप्रकर्तव्यंपवित्रारोपणंहरेः।शिवस्यतत्रैवोक्तेः। श्रावणशुक्लचतुर्दशीपूर्वयुताग्राह्या।चैत्रचतुर्दशीवत्॥ अथोप
कर्म।तच्चश्रवणहस्तेः।श्रवणेकार्यं।दिनद्वयेश्रवणेतुउत्तरंग्राह्यं।वृद्धमनुकात्यायनौ।अर्धरात्रोदयस्ताचेत्संक्रांतिर्ग्रहणंतथा
२४ उपाकर्मनकर्तव्यंतथापरेप्यन्यदोषकृत्।इदंचकर्कटस्थेभानौनिषिद्धं।सचनिषेधोनर्मदोत्तरभागविषयः।इतिमाधवीयण
ऽमृतादौस्थितंनर्मदोत्तरभागेतुकर्तव्यंसिंहस्थेऽर्के।कर्कटेसंस्थितेभानावुपाकुर्यात्तुदक्षिणइतिवचनात्।केचित्तु
सामगानांसिंहस्थेरवावुपाकर्मविधानात्तेष्वेवास्योपसंहारश्चतुर्दशीकरणवाक्यस्याप्येवंयथेतिवदंति।एतच्चशुक्रास्तादा राम
वपिकार्यं।प्रथमारंभस्तुतत्रनभवति।आद्यमासेनचलत्वेन।सामगानांत्वधिमासेऽपिभवति।एतच्चसामगैरपराह्णेकार्यं
इतरैःपूर्वाह्णे।इदंचयाजुषाःपर्वणिकुर्युः।पर्वदिनद्वयेतुआपस्तंबैरुत्तरंग्राह्यं।इतरैःपूर्वं।इदंचोपासनेऽग्नौकर्तव्यं॥ ८
अध्यायोत्सर्जनइतिपक्षेतुलौकिकाग्नौ।आश्वलायनेनश्रवणाकर्मोक्तं।आश्वयुज्यांपौर्णमास्यांश्रवणाकर्मेति।तत्रास्त
मयतुयुग्माद्या।अस्तमितेस्थालीपाकंश्रपयित्वेतिसूत्रात्।मधुनसागरेनारदः।भानौसिंहगतेसूर्येयस्यगोःसंभवस्तय
तेमरणंतस्यनिर्दिष्टंषड्भिर्मासैर्नसंशयः।तत्रशांतिंप्रवक्ष्यामियेनसंपद्यतेशुभं।प्रसूतांतत्क्षणादेवतांगांविप्रायदापये
त्।ततोहोमंप्रकुर्वीतघृताक्तैराजसर्षपैः।आकृतीनांघृताक्तानामयुतंजुहुयात्ततः।व्याहृतिभिश्चायंहोमःसोपवासः

प्रयत्नेनदद्याद्विप्रायदक्षिणामिति।अथर्ववेदिनांगृह्यपरिशिष्टे।माघेबुधेचमहिषीश्रावणेवडवादिवा।सिंहे
गावःप्रसूयंतेस्वामिनोमृत्युदायकाइति।अत्रतदुक्ताअमृताख्याशांतिःकार्या।श्रावणादिमासचतुष्टयेकृष्ण
पक्षद्वितीयासुअशून्यशयनव्रतं।तत्रचंद्रोदयव्यापिनीग्राह्या।दिनद्वयेतत्त्वेतुपरेतिनिर्णयामृते।नभःकृष्ण
तृतीयाकज्जलीसंज्ञा।सापरेतिदिवोदासीये।नभोबहुलचतुर्थीबहुलाख्यामध्यदेशेप्रसिद्धा।सासायाह्नव्यापि
नीग्राह्या।दिनद्वयेतथात्वेपूर्वा।अत्रगोप्रजायवान्नाशनंकार्यमितिदिवोदासीये।अथजन्माष्टमी।साचश्रावण
कृष्णा।पूर्णिमांतपक्षेभाद्रपदकृष्णा।जन्माष्टमीव्रतंचनित्यं।जयंतीव्रतंतुनित्यंकाम्यं।यस्मिन्वर्षेजयंत्याख्योयो
गोजन्माष्टमीतदा।अंतर्भूताजयंत्यांस्यादृक्षयोगप्रशस्तितइतिमाधवः।हेमाद्रिस्तुजयंतीव्रतंभिन्नं।जयंतीश
ब्दोरोहिणीविशेषवचनः।अभिजिन्नामनक्षत्रंजयंतीनामशर्वरी।मुहूर्तोविजयोनामयत्रजातोजनार्दनः।इति
ब्रह्मोक्तवचनात्।तेनतद्युक्तरोहिण्यांगौणएव।कर्मकालश्चनिशीथं।ममयोगेतुरोहिण्यांनिशीथेराजसत्तम।समजा
यतगोविंदोबालरूपीचतुर्भुजः।तस्मात्तंपूजयेत्तत्रेतिवह्निपुराणात्।एवंचरोहिणीयोगाभावेऽर्धरात्रव्यापिन्य
ष्टमीग्राह्या।परदिनेसत्त्वेपिनक्षत्रयोगोकिंचित्करः।बुधवारादिवत्।यत्तुस्कांदे।उदयेचाष्टमीकिंचिन्नवमीसकल
रादि।लभतेबुधसंयुक्ताप्राजापत्यर्क्षसंयुता।अपिवर्षशतेनापिलभ्यतेवानलभ्यतइति।तद्दानादिविषयं।उप

श्रवणात् उदये चंद्रोदये इति व्याख्येयं। अर्द्धरात्रे तु योगोयं तारापत्युदये सतीति चित्युधर्मोक्तेः। अत्र केचित्
उदयव्यापिनी ग्राह्या ऊर्ध्वे तिथिरूपोषणे। निंबार्का नवौ। न येषां वां छितार्थप्रदायक इति व्रत हेमाद्रौ नी वि स धर्मी व्र
न लिख्यदच नानिंबादित्य संप्रदायिनामौदयिकी वेयं। एवं शिवरात्र्यादिकमपीत्याहुः। तद्ब हवो नाद्रियंते। प्र
णेन निर्णस [illegible] तेनियं त्रितस्यास्यान्यत्र गमनायोगादिति दिक्। श्रीकृष्णदेवकीवसुदेवयशोदानंदादिप्रतिमा
निर्माणतत्पूजाप्रकारादिकं व्रतहेमाद्रौ स्पष्टं। तत्रैवक्तविशेषः। चंद्रार्घ्यमंत्रो। क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भ
व। गृहाणार्घ्यं शशांकेमं रोहिण्या सहितो मम। ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषां पते। नमस्ते रोहिणीकांत अर्घ्यं नः प्रति
गृह्यतां इति। श्रावणेमावास्यायां कुशग्रहणमुक्तं हेमाद्रौ हारीतेन। मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः। अया राम
तयामास्ते दर्भा विनियोज्याः पुनः पुनरिति। नभाः श्रावणः दर्शांतपक्षेणेदं। मदनरत्ने तु मासे नभस्यमावास्या त १
स्यां दर्भोच्चयो मत इति मरीचिवाक्यमुदाहृतं। इदं च पूर्णिमांताभिप्रायेणेति हारिते न सहैकवाक्यत्वेन। केचित्तु मरीचि
वाक्येपि दर्शांतपक्षमाश्रित्य महालयांतर्गतपक्षे कुशोच्चयमाहुः॥ इति श्रावणः॥ ॥भाद्रशुक्लतृतीयायां हरि
तालिकाव्रतं। तत्र परा ग्राह्या। मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं परे इति माधवोक्तेः॥ हरितालिकात्वपुरस्का
णापि परविद्धग्रहणवचनानां दिवोदासीये उदाहृत्वाच्च॥ ॥भाद्रशुक्लचतुर्थी वरदचतुर्थी। सा पूर्वा मातृविद्धोग

णेश्वरइत्युक्तेः। इयं ५ विशेषमयोरतिप्रशस्ता। भाद्रशुक्लचतुर्थी या नोमे नार्केण वा युता। महती सात्र विघ्नेश
मर्चित्वेष्टं लभेन्नरः। इति निर्णयामृते वाराहोक्तेः। अत्र चंद्रदर्शनं निषिद्धं। तथा चापरार्के मार्कंडेयः। सिंहादित्ये
शुक्लपक्षे चतुर्थ्यां चंद्रदर्शनं। मिथ्याभिदूषितं कुर्यात्तस्मात्पश्येन्न तं सदा। पाराशरः। कन्यादित्ये चतुर्थ्यां तु शु
क्ले चंद्रस्य दर्शनं। मिथ्याभिदूषितं कुर्यात्तस्मात्पश्येन्न तं सदा। तद्दोषशांतये सिंहः प्रसेनमिति वै पठेत्। इति। श्लो
कस्तु विष्णुपुराणे। सिंहः प्रसेनमवधीत् सिंहो जांबवता हतः। सुकुमारक मा रोदीस्तव ह्येष स्यमंतकः इति। भा
द्रशुक्लपंचमी ऋषिपंचमी। सा हेमाद्रिमते परा। मिताप रस्युतास्यात् पंचमी तिद्दीपिकोक्तेः। माधवमते तु सर्वा
सर्वत्र पंचमी पूर्वेत्युक्तेः। अत्र कर्तव्यनिर्णयामृते स्पष्टं॥ भाद्रशुक्लाष्टमी दूर्वाष्टमी। सा पूर्वा ग्राह्या। शुक्लाष्टमी
तिथिर्या तु मासि भाद्रपदे भवेत्। दूर्वाष्टमी तु सा ज्ञेया नोत्तरा सा विधीयते। इति पुराणसमुच्चयोक्तेः। यत्तु हू
र्त्तेतिहिणस्थम्यां पूर्वा वा यदि वा परा। दूर्वाष्टमी तु सा कार्या ज्येष्ठामूलं च वर्जयेदिति डरस्याग्राह्यत्व वचनं।
तत्र दूर्वेदितेन्ये चादियोगेइष्टव्यं। दूर्वाष्टमी सदा त्याज्या ज्येष्ठामूलर्क्षसंयुता। तथा ऐंद्रर्क्षसनिता पूर्वाह्लं त्यक्त्वा
निना न्यथा। गर्गः। मुईशमूले तस्मात्तां परिवर्जयेदिति तन्निषेधादिति हेमाद्रौ स्थितं। इदं चागस्त्योदये कन्यार्के
[illegible] कार्यं। अत एव भाद्रपदे मासि दूर्वासंज्ञा तु साष्टमी। सिंहार्क एव कर्तव्या न कन्यार्के कदाचन। सिंहस्थे सोत्तमा स्या

नुदिते मुनिसत्तमे · इति मदनरत्ने स्कांदोक्तेः । अगस्त्य उदिते तात पूजयेदमृतोद्भवां । वैधव्यं पुत्रशोकं च दशवर्षाणि
पंच चेति तत्रैव दोषोक्तेश्च ॥ इदं च व्रतं स्त्रीणां नित्यं · या न पूजयते दूर्वां मोहादिह यथाविधि · त्रीणि जन्मानि वैधव्यं
लभते नात्र संशय इति पुराणसमुच्चयात् । यदा ज्येष्ठादिके विनाष्टमी न लभ्यते तदा तत्रैवोक्तं । कर्तव्या चैकभक्तेन
मूलयदा च वेत् · दूर्वामभ्यर्चयेद्भक्त्या नवं धान्यं दिवसं नयेदिति · अत्र विधिर्मदनरत्ने भविष्ये · शुचौ देशे प्रजातायां
दूर्वायां ब्राह्मणोत्तम · स्थाप्य लिंगं ततो गंधैः पुष्पैर्धूपैः समर्चयेत् । दध्यक्षतैर्द्विजश्रेष्ठ अर्घ्यं दद्यात्त्रिलोचने । दूर्वा
ग्रामीत्यां विधिवत्पूजयेच्छ्रद्धया चिता मंत्रस्तु त्वं दूर्वेऽमृतजन्मासि वंदितासि सुरासुरैः । सौभाग्यं संततिं देहि स
र्वकार्यकरी भव · यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले । तथा ममापि संतानं देहि त्वमजरामरमिति । अत्रा
नग्निपक्वं भक्षयेत् । अनग्निपक्वमश्नीयाद्दधि फलं तथा · क्षारलवणं ब्रह्मन्नाश्नीयात् इति तत्रैव भविष्योक्तेः । राम
अत्रैव ज्येष्ठापूजोक्ता · माधवीये स्कांदे · मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते · यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठा १०
याः परिपूजनं इति । इयं ज्येष्ठायोगवशेन पूर्वा परा वा ग्राह्या · दिनद्वये योगे परा · पूर्वेद्यू रात्रियोगे पूर्वैव · नवम्यास
ह कार्या स्यादष्टमी नात्र संशयः । मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता · रात्रिर्यस्मिन्दिने तत्र ज्येष्ठायाः परिपूजन
मिति तत्रैवोक्तेः । अस्यापवादः । यस्मिन्दिने न चेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणुः । तस्मिन्हविष्यं पूजा चन्दनाचेत्र